# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 3rd Semester Examination, 2021-22

## SANHGEC03T/SANGCOR03T-SANSKRIT (GE3/DSC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः – 2×5 = 10

(क) स्वप्नवासवदत्तमिति नाटकस्य नायकः कः ? स कस्य राज्यस्य अधिपतिः आसीत् ?

(ख) वासवदत्ता का ? अस्मिन् नाटके विदूषकस्य नाम किमासीत् ?

(ग) स्वप्नवासवदत्तमिति नाटके कति अङ्काः सन्ति ? लावाणकवृत्तान्तः कस्मिन् अङ्के उपस्थापितः ?

(घ) स्वप्नवासवदत्तमित्यस्य भरतवाक्यं किमस्ति ?

(ङ) ''दुःखं न्यासस्य रक्षणम्''- वक्ताः कः ? स कस्मादेवमुक्तवान् ?

(च) ''कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः''- अस्य वचनस्य तात्पर्यं किम् ?

(छ) ''तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः''- कमुद्दिश्य केनमिदमुक्तम् ?

### SECTION-B

2. अधोलिखितेषु यथाभिमतं प्रश्नद्वयस्य उत्तरं लेख्यम् – 10×2 = 20

(क) अभिज्ञानशकुन्तलमिति नाटके दुर्वाससः अभिशापस्य नाटकीयतात्पर्यं विचार्यताम्।

(ख) अभिज्ञानशकुन्तलमिति नाटके राज्ञो दुष्यन्तस्य चरित्रं यथोपस्थापितं तत्कालीनसमाजदृष्ट्या तस्य मूल्याङ्कनं क्रियताम्।

(ग) अभिज्ञानशकुन्तलमिति नामकरणं कियद्युक्तं तन्नाटकस्य कथाविन्यासमनुसृत्य विचार्यताम्।

(घ) महाकवि-कालिदासेन अभिज्ञानशकुन्तलनाटके यादृशं समाजचित्रं चित्रितं तद्वर्ण्यताम्।

3. निम्नलिखितेषु चत्वारः प्रश्नाः समाधेयाः। तेषु एकः संस्कृतभाषया देवनागरलिप्या च समाधेयः। 5×4 = 20

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ इति श्लोको व्याख्यायताम्।

(ख) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥- श्लोकोऽयं व्याख्यायताम्।

(ग) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥-इति श्लोकः व्याख्येयः।

(घ) अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्॥- श्लोकस्यास्य तात्पर्यं व्याख्येयम्।

(ङ) टीका लेख्या- महर्षिः कण्वः।

(च) विदूषक इति नाटकीयपात्रमवलमम्ब्य टिप्पनी करणीया।

(छ) अभिज्ञानशकुन्तलमिति नाटकस्य नान्दीश्लोकस्य तात्पर्यं विवृणुत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——